**CLASS : 10th (Secondary)** **Code No. 3543**

**Series : Sec/Annual Exam.-2026**

*रोल नं०* | | | | | | | | | | |

# पूर्व मध्यमा सह माध्यमिक परीक्षा संस्कृत साहित्य (परम्परागत संस्कृत विद्यापीठ)

**Sub. Code : 1003/SSA**

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **5** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*

- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशाः* -(क) ***सर्वे प्रश्नाः समाधेयाः।***

(ख) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(ग) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(घ) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

## खण्डः 'क'

**[ वस्तुनिष्ठात्मक प्रश्नाः ]**

**1.** अधोलिखितानां प्रश्नानामुत्तरं विकल्पेषु ***शुद्धविकल्पं*** चित्वा लिखत — $1 \times 10 = 10$

(i) श्री नारायणेन रचितः -

(क) हितोपदेशः (ख) उत्तररामचरितम्

(ग) स्वप्नवासवदत्तम् (घ) कादम्बरी

(ii) विद्याम् अर्थं च क चिन्तयेत् ?

(क) मूर्खः (ख) कलही

(ग) धनी (घ) प्राज्ञः

(iii) विनयात् कां याति ?

(क) गतिं (ख) पात्रत्राम्

(ग) उन्नतिम् (घ) मानम्

(iv) नवे भाजने लग्नः कोऽन्यथा न भवेत् ?

(क) अहंकारः (ख) मानः

(ग) संस्कारः (घ) धनम्

(v) भागीरथे तटे कं नामधेयं नगरम् ?

(क) पाटलिपुत्र (ख) अर्गलपुर

(ग) हस्तिनापुर (घ) द्वारिकापुरी

(vi) सुदर्शनः कः ?

(क) सेवकः (ख) धनिकः

(ग) क्षुधार्ती (घ) नरपतिः

(vii) सर्वस्य लोचनं किम् ?

(क) शास्त्रम् (ख) धनम्

(ग) नीतिः (घ) गुरुः

(viii) कस्मिन् संसारे मृतः को वा न जायते ?

(क) अपरिवर्तिनि (ख) क्षणे

(ग) परिवर्तिनि (घ) निश्चले

(ix) जीवलोकस्य कति सुखानि ?

(क) पञ्च (ख) षड्

(ग) अष्ट (घ) पंचदश

(x) कीदृशी माता शत्रुः ?

(क) व्यभिचारिणी (ख) धनवती

(ग) सुन्दरी (घ) आयुष्मती

**2.** अधोलिखितानां प्रश्नानां उत्तराणि ***एकपदेन*** ददतु — 1 × 30 = 30

(i) धूर्जटेः कस्य नाम ?

(ii) मृत्युना गृहीत केशेषु कम् आचरेत् ?

(iii) धनाद् किं भवति ?

(iv) नरपतेः किन्नाम ?

(v) सर्वभूतेषु आत्मवत् कः पश्यति ?

(vi) गवां प्रकृत्या मधुरं किं भवति ?

(vii) स्वभावः कुत्र वर्तते ?

(viii) धनैरपि किं रक्षेत् ?

(ix) चित्रग्रीवः कः ?

(x) गुरुः सर्वत्र को भवति ?

(xi) कापुरुषाः किं वदन्ति ?

(xii) मशकः कस्य चरितं करोति ?

(xiii) को वलवान् ?

(xiv) नरः कानि पश्यति ?

(xv) मूषकस्य किन्नाम ?

(xvi) अष्टविधो मार्गः कस्य ?

(xvii) ऊष्णः कः दहति ?

(xviii) शुकवद् कः पाठ्यते ?

(xix) कः संशयं अनारुहय भद्राणि न पश्यति ?

(xx) कस्मिन् दानं सफलं भवति ?

(xxi) परद्रव्येषु लोष्टवत् कः पश्यति ?

(xxii) काम् विना ज्ञानं भारः ?

(xxiii) आत्मवत् सर्वभूतेष कः पश्यति ?

(xxiv) असम्भवं कस्य जन्म ?

(xxv) लोभः कस्य कारणम् ?

(xxvi) पुसां मलिनाः का भवन्ति ?

(xxvii) विरलं सुतं का जनयति ?

(xxviii) भूतिमिच्छता केन षड् दोषाः हातव्याः ?

(xxix) सततं कं रक्षेत् ?

(xxx) कल्पान्तस्थायिनो के भवन्ति ?

खण्डः 'ख'

[ अतिलघूत्तरीयाः प्रश्नाः ]

**3.** निम्नांकित श्लोकेषु रिक्तस्थानि पूरयत — $2 \times 7 = 14$

(क) अवश्यं भाविनो ................. हरेः।।

(ख) ईर्ष्यी घृणी ................ दुःखभागिनः।।

(ग) यस्य मित्रेण ............... पुण्यवान्।।

(घ) यानि कानि च ............ मुक्तबन्धनाः।।

(ङ) न त्वेवाहं ............... वयमतः परम्।।

(च) वेदाविनाशिनं ................ हन्तिकम्।।

(छ) यदासंहरते ................ प्रतिष्ठिता।।

खण्डः 'ग'

[ लघूत्तरीयाः प्रश्नाः ]

**4.** निम्नलिखित श्लोकेषु कयोश्चिद् ***द्वयोः*** व्याख्या सप्रसंग विधेया — $3 \times 2 = 6$

(क) देहिनोऽस्मिन् यथा देहे कौमारं यौवन जरा।

तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति।।

(ख) दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।

वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।।

(ग) दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।

देशे काले च पात्रे च तद्दानं सात्विकं विदुः।।

(घ) यानि कानि च मित्राणि कर्तव्यानि शतानि च।

पश्य मूषकमित्रेण कपोता मुक्तबन्धनाः।।

**5.** निम्नांकित श्लोकान् पठित्वा श्लोकाधारित प्रश्नानां उत्तरं ददतु – $5 \times 4 = 20$

(i) वासांसि जीर्णानि यथा विहाय

नवानि गृहणति नरोऽपराणि

तथा शरीराणि विहाय जीर्णा -

न्यन्यानि संयाति नवानि देही।।

(क) कीदृक् वासांसि विहाय नवानि गृहणाति ?

(ख) कः अपराणि गृहणाति ?

(ग) देही शब्दस्य कोऽर्थः ?

(घ) कानि विहाय देही नवानि गृहणाति ?

(ङ) कस्य अध्यायस्य श्लोकः ?

(ii) क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।

स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।

(क) क्रोधात् किं भवति ?

(ख) सम्मोहः कस्माद् उद्भवति ?

(ग) स्मृतिभ्रंशाद् किं भवति ?

(घ) कस्य नाशाद् प्रणश्यति ?

(ङ) स्मृतिविभ्रमः कस्मात् प्रभवति ?

(iii) सर्वस्य हि परीक्ष्यन्ते स्वभावाः नेतरे गुणाः।

अतीत्य हि गुणान् सर्वान् स्वभावोमूर्ध्नि वर्तते।।

(क) सर्वस्य किं परीक्ष्यन्ते ?

(ख) स्वभावाः कस्य परीक्ष्यन्ते।

(ग) को मूर्ध्नि वर्तते ?

(घ) स्वभावः कुत्र वर्तते ?

(ङ) को छन्दो विद्यते ?

(iv) असम्भवं हेममृगस्य जन्म
तथापि रामो लुलुभेमृगाय।
प्रायः समापन्नविपत्तिकालेः
धियोऽपि पुंसां मलिना भवन्ति।।

(क) कस्य जन्म असम्भवम् ?

(ख) को मृगाय लुलुभे ?

(ग) समापन्नविपत्तिकाले केषां धियो मलिना भवन्ति ?

(घ) विपत्तिकाले पुसां धियः कीदृशी भवन्ति ?

(ङ) रामः कस्मै लुलुभे ?